**मुख्यवार्ता:**

- मन्त्रिमण्डलसमित्या रेलमन्त्रालयस्य परियोजनाद्वयं अनुमोदितम्। एतयोः परियोजनयोः कुलव्ययः पञ्चोत्तर चतुः शताधिक षट् सहस्र ६,४०५ कोटिरूप्यकाणाम् अस्ति। ऑस्ट्रियायां

- प्रधानमन्त्री मोदी सोशल मीडिया इत्यत्र लिखितवान् यत् "मूलसंरचनायाः परिवर्तनस्य एषा यात्रा एकादश वर्षाणि सम्पन्नवती।

- भारतस्य सामाजिकसुरक्षाक्षेत्रं पञ्चदशोत्तरद्विसहस्रतमे वर्षे ऊनविन्शतिप्रतिशतात् प्रवर्तमाने वर्षे त्रि दशान्शोत्तर चतुः षष्टिप्रतिशतं यावत् वर्धितम्।

- भारतऋतुविभागेन उक्तं यत् अस्य मासस्य द्वादश दिनाङ्कतः षोडश दिनाङ्कपर्यन्तं दक्षिणप्रायद्वीपीयभारते, कोङ्कने, गोवायां च कतिपयेषु स्थानेषु अतिवृष्टेः सम्भावना प्रकटिता।

- अमरीकायां ट्रम्प-प्रशासनस्य आव्रजन निगडनानां विरोधे प्रदर्शनं तीव्र जातम्। एतत् प्रदर्शनम् लॉस angiles तः बहिः भवत् अंस्ति।

- अद्य अपराह्ने लॉर्ड्स्-स्थले विश्व-टेस्ट-चैम्पियनशिप-स्पर्धायाः निर्णायक-क्रीडा सम्प्रति प्रचलति, यत्र दक्षिण-आफ्रिका-दलेन पणकं विजित्य कन्दुक क्षेपणं चितम्।

**मन्त्रिमण्डलसमित्या**

मन्त्रिमण्डलसमित्या रेलमन्त्रालयस्य परियोजनाद्वयं अनुमोदितम्। एतयोः परियोजनयोः कुलव्ययः पञ्चोत्तर चतुः शताधिक षट् सहस्र कोटिरूप्यकाणाम् अस्ति। भारतीयरेलमार्गस्य बल्लारी-चिकजाजुर्-दबलिन्ग -परियोजनायाः कोडरमा- बरकाकाना दबलिन्ग परियोजनायाः च अनुमोदनं कृतम् अस्ति । अश्विनी वैष्णव: कोडरमा- बरकाकाना दबलिन्ग परियोजनायाः कृते उक्तवान्। अपि च बल्लारी-चिकजाजुर्-दबलिन्ग -परियोजनायाः तेन प्रोक्तम्।

**प्रधानमन्त्री एकादश वर्ष**

प्रधानमन्त्री मोदी सोशल मीडिया इत्यत्र लिखितवान् यत् "मूलसंरचनायाः परिवर्तनस्य एषा यात्रा एकादश वर्षाणि सम्पन्नवती। रेलमार्गः, राजमार्गः, पत्तनानि, विमानस्थानकं च इत्यादिषु क्षेत्रेषु उत्तमाः आधारभूतसंरचना निर्मिताः, येन देशस्य विकासः त्वरितः अभवत्। भारतस्य एताः वर्धमानाः आधारभूतसंरचना: जनानां जीवनं सुलभं कुर्वन्ति, समृद्धिं च प्रवर्धापयन्ति। एषः विकासः न केवलं मार्गेषु, रेलमार्गेषु, विमानस्थानकेषु वा सीमितः , अपितु डिजिटल इत्यत्र, स्वच्छ ऊर्जायाः, स्मार्टनगरानणां च माध्यमेन जीवनस्य गुणवत्तां आर्थिकसमृद्धिं च वर्धापयति| एषा आधारभूतसंरचनाक्रान्तिः भारतं स्वावलम्बि, समृद्धं, स्थायिराष्ट्रं च स्थापितवती।

**भारतस्य सामाजिकसुरक्षा**

भारतस्य सामाजिकसुरक्षाक्षेत्रं पञ्चदशोत्तरद्विसहस्रतमे वर्षे ऊनविन्शतिप्रतिशतात् प्रवर्तमाने वर्षे त्रि दशान्शोत्तर चतुः षष्टिप्रतिशतं यावत् वर्धितम्। अन्तर्राष्ट्रीयश्रमसङ्गठनस्य नवीनतमदत्तांशस्य अनुसारं विगतदशके अस्मिन् क्षेत्रे पञ्चचत्वारिन्शत् प्रतिशताङ्कानां वृद्धिः अभवत्। अन्तार्राष्ट्रीयश्रमसङ्गठनेन भारतस्य उपलब्धिं स्वीकृत्य आधिकारिकतया स्वस्य प्रतिवेदने प्रकाशितं यत् चतुर्णवत

कोटितोप्यधिकाः जनाः, अधुना न्यूनातिन्यूनम् एकस्य सामाजिकसंरक्षणलाभस्य अन्तर्गतं आच्छादिताः सन्ति। लाभार्थीगणनायाः दृष्ट्या भारतं अधुना विश्वे द्वितीये स्थाने अस्ति, यत्र प्रायः चतुर्नवति-कोट्यावत् नागरिकाणां सामाजिकसंरक्षणं प्रदाति । श्रम-मन्त्री डॉ. मनसुख मण्डाविया इत्यस्य सोशल मीडिया-सन्देशस्य प्रतिक्रियारूपेण श्रीमोदिना एतेषां उपक्रमानाम् प्रभावशीलतायाः, प्रसारस्य च प्रशंसनीयवृद्धेः प्रशंसा कृता।

**ट्रम्प**

अमरीकायां ट्रम्प-प्रशासनस्य आव्रजन निगडनानां विरोधे प्रदर्शनं तीव्र जातम्। एतत् प्रदर्शनम् लॉस angeles त: बहि: भवत् अंस्ति।

**प्रधानमन्त्री-कबीरदास**

प्रधानमन्त्री नरेन्द्रमोदी अद्य संतकबीरदासस्य जन्मदिवसस्य श्रद्धांजलिम् दत्तवान्, असौ अमुं जीवनं सामाजिकसद्भावस्य भक्तम् वर्णितवान्। प्रधानमन्त्रिणा एकेन वीडियो-माध्यमेन उक्तं यत्, " संतकबीरदासस्य जन्मदिवसस्य श्रद्धांजलि: समर्प्यते । येन सामाजिक-सद्भावनायै सम्पूर्णं जीवनं समर्पितम्। भारतीयमानसस्य उपरि संतकबीरदासस्य गहनप्रभावं प्रकाशयन् मोदी उक्तवान् यत् सामाजिकदोषाणां उन्मूलनार्थं तस्य योगदानं सदैव श्रद्धया स्मर्यते। संतकबीरदासस्य दोहा: अद्यत्वे अपि लोकप्रियाः सन्ति। ते जीवनस्य बहुमूल्यं पाठं ददति, सामाजिक- सद्भावस्य सन्देशं च प्रसारयन्ति।

**ताइवान - भारत उद्धार:**

ताइवान देशेन अद्य भारताय धन्यवादः प्रदत्तः यत् सः सिङ्गापुर-ध्वजयुक्तस्य मालवाहकपोतस्य अष्टादश चालकदलीय सदस्यान् उद्धारितवान् यत् अद्यैव केरलतटतः प्रायः सप्तति समुद्रीमील परिमिते दूरे अग्निना प्रज्वलितम्। भारतीयनौसेनायाः प्रवक्त्रानुसारं जलयाने एकस्मिन् आन्तरिकभंडारपात्रे विस्फोटस्य सूचना आसीत्, यस्य परिणामेण जलयाने महती अग्निकाण्डम् अभवत् भारतीयनौसेना, भारतीयतटरक्षकदलस्य, डीजीशिपिङ्ग इत्यस्य, अन्ये च हितधारकाः सम्मिलिताः निकटसमन्विते अन्वेषण-उद्धार-कार्यक्रमे सोमवासरे द्वाविंशति चालकदलस्य सदस्येषु अष्टादश जनाः सुरक्षितरूपेण उद्धारिताः। शेषचतुर्णां चालकदलीय सदस्यानां, ये जलयानस्य अग्निशामकसुरक्षाविभागस्य भागाः आसन्, तेषाम् अन्वेषणं प्रचलति।

**ऋतु-विभाग:**

भारतऋतुविभागेन उक्तं यत् अस्य मासस्य द्वादश दिनाङ्कतः षोडश दिनाङ्कपर्यन्तं दक्षिणप्रायद्वीपीयभारते, कोङ्कने, गोवायां च कतिपयेषु स्थानेषु अतिवृष्टेः सम्भावना प्रकटिता। उत्तरभारतस्य अधिकांशभागेषु तीव्रतापतरङ्गः व्याप्तः अस्ति, यत्र तापमानं सामान्यतः अधिकं वर्धितम् अस्ति। पञ्जाबराज्ये बथिण्डायां ह्यः सप्तचत्वारिंशत् डिग्री सेल्सियसपर्यन्तं तापमानं जातम्, राजस्थानस्य गंगानगरनगरे तु चत्वारि दशमलवाधिक सप्तचत्वारिंशत् डिग्री सेल्सियसपरिमितं यावत् तापमानं जातम्। जम्मू-कश्मीरे सम्पूर्णे जम्मू-क्षेत्रस्य केषुचित् भागेषु अधिकतमं तापमानं चतुश्चत्वारिंशत् डिग्री सेल्सियस यावत् अभवत् ऋतुविभागेन एतदपि उक्तं यत् उत्तरीमध्यप्रदेशे, पञ्जाबे, जम्मू-कश्मीरे, लद्दाखे, गिल्गित-बाल्तिस्ताने, मुजफ्फरबादे, हिमाचलप्रदेशे, हरियाणायां, पश्चिमोत्तरप्रदेशे च आगामिदिनद्वयं यावत् तापतरङ्गस्य स्थितिः प्रचलिष्यति।

**संजय झा - प्रतिनिधिमण्डलम्**

पञ्चदेशेषु सर्वदलीयप्रतिनिधिमण्डलस्य नेतृत्वं कृत्वा जदयू सांसदः संजय झाः अवदत् यत् प्रतिनिधिमण्डलेन स्वविविधोपवेशनेषु सिन्दूराभियानस्य अनन्तरं पाकिस्तानेन प्रायोजितस्य आतङ्कवादस्य विरुद्धं भारतस्य सशक्तं भावं प्रभावीरूपेण प्रकटितम्। सः अवदत् यत् प्रतिनिधिमण्डलं इन्डोनेशिया, मलेशिया, दक्षिणकोरिया, जापान, सिङ्गापुरदेशं गतवान् इति। नवदिल्ल्यां वार्ताहरैः सह भाषमाणः श्रीझा: अवदत् यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना सह मेलनावधौ प्रतिनिधयः स्वस्य अनुभवान् प्रकटितवन्तः यात्राकाले प्राप्तप्रतिक्रियायाः प्रतिवेदनानि च प्रदत्तवन्तः।

**गृहमन्त्री अमित शाह**

केन्द्रीय गृह-मन्त्री अमित शाह: प्रोक्तवान् मोदी प्रशासनम् इंफ्रा क्रांति इत्यस्य एकादश वर्षेक देशं एकस्यानन्तरं पुन: एकां अभियान्त्रिकी-चमत्कारं प्रदाय भारतस्य पुनर्निर्माणं कृतवात्। सोशल मीडिया पोस्ट इत्या श्रीशाह: अवदत् यत् नवनिर्मिता: अत्याधुनिका: इंफ्रास्ट्रक्चर- परियोजना: जनान् समीपे कारयित्वा राष्ट्रैक्यं दृढं कृतवानत्। अभूतपूर्वया गत्या व्यापार-वाणिज्ययो: प्रवाहं सक्षमंम् अकरोत् ।

**ओडिसा**

ओडिशायां देवस्नान-पूर्णिमा-अवसरे अद्य प्रातःकालात् पवित्र-पुरी-नगर्यां भगवतः जगन्नाथस्य -भगवतः बलभद्रस्य -देव्याः सुभद्रायाः -भगवतः सुदर्शनस्य विविधानि अनुष्ठानानि प्रचलन्ति। अस्माकं संवाददाता उक्तवान् यत् ज्येष्ठपूर्णिमादिने आयोज्यमानः देवस्नानमहोत्सवः वार्षिकरथयात्रायाः आरम्भस्य प्रतीकमस्ति। एतत् पर्व ओडिशा-नगरस्य जनानां कृते महत् महत्त्वं दधाति।

**योगा**

ऐषमः वर्षस्य दिनाङ्के जूनमासस्य एकविंशति अन्ताराष्ट्रीययोगदिवसः अद्य नवदिल्ल्यां आकाशवाण्याः रंगभवने "कार्यस्थल पर योग" इति विषयिकायाः कार्यशालायाः आयोजनं कृतम्। सत्रमिदं जयपुरस्य नैशनल स्वस्थावृत्तएवं योग विभागस्य आचार्यः डॉ पुनीत चतुर्वेदी स्वीकृतवान्।

**भारतस्य विपण्य**

भारतस्य सूचीबद्धाः समवायाः प्रवर्तमान वर्षस्य मार्चमासस्य आरम्भतः विपण्यपूञ्जीकरणे प्रायः एक ट्रिलियन् डॉलरं यावत् प्राप्तवन्तः। अक्टोबर् चतुर्विंशत्युत्तर द्विसहस्रतः फरवरी पञ्चविन्शति उत्तर द्विसहस्र पर्यन्तं पञ्चमासानां परिष्कारानन्तरं नितरां वर्धमाना अस्ति ।विश्वस्य शीर्ष दश इक्विटीविपणेषु एषा सर्वाधिका वृद्धिः अस्ति। भारतमधुना अमेरिका, चीन, जापान, हाङ्गकाङ्ग इत्यादीनामनन्तरम् वैश्विकस्तरेण पञ्चमः बृहत्तमाः विपण्यः अस्ति ।

**क्रिकटि-**

अद्य अपराह्ने लॉर्ड्स्-स्थले विश्व-टेस्ट-चैम्पियनशिप-स्पर्धायाः निर्णायक-क्रीडा सम्प्रति प्रचलति, यत्र दक्षिण-आफ्रिका-दलेन पणकं विजित्य कन्दुक क्षेपणं चितम् ।

**।। इति वार्ताः ।।**